# 42 - द्विचत्वारिंश दशकम्

## शकटासुर वधम्

कदापि जन्मर्क्ष दिने तव प्रभो निमन्त्रित ज्ञाति वधू महीसुरा ।
महानसस् त्वां सविधे निधाय सा महान सादौ ववृते व्रजेश्वरी ॥॥42-1॥

ततो भवत् त्राण नियुक्त बालक प्रभीति सङ्क्रन्दन सङ्कुला रवैः ।
विमिश्र मश्रावि भवत् समीपतः परिस्फुटत् दारु चटच् चटारवः ॥॥42-2॥

ततस् तदा कर्णन सम्भ्रम श्रम प्रकम्पि वक्षोज भरा व्रजाङ्गनाः ।
भवन्त मन्तर् ददृशुस् समन्तत विनिष्पतत् दारुण दारु मध्यगम् ॥॥42-3॥

शिशो रहो किं किमभू दिति द्रुतं प्रधाव्य नन्दः पशु पाश्च भूसुराः ।
भवन्त मालोक्य यशोदया धृतं समाश्वसन् नश्रु जलार्द्र लोचनाः ॥॥42-4॥

कस्को नु कौतस्कुत एष विस्मयः विशङ्कटं यच्छकटं विपाटितम् ।
न कारणं किञ्चिदिहेति ते स्थिताः स्वनासिका दत्तकरास् त्वदीक्षकाः॥॥42-5॥

कुमारकस् यास्य पयोधरार्थिनः प्ररोदने लोल पदाम्बुजा हतम् ।
मया मया दृष्ट मनो विपर्यगात् इतीश ते पालक बालका जगुः ॥॥42-6॥

भिया तदा किञ्चि दजानता मिदं कुमार काणा मति दुर्घटं वचः ।
भवत् प्रभा वाविदुरै रिती रितं मनागि वाशङ्क्यत दृष्ट पूतनैः ॥॥42-7॥

प्रवाल ताम्रं किमिदं पदं क्षतं सरोज रम्यौ नु करौ विरोजितौ।
इति प्रसर्पत् करुणा तरङ्गिताः त्वदङ्ग माप स्पृशु रङ्गना जनाः ॥॥42-8॥

अये सुतं देहि जगत्पतेः कृपा तरङ्ग पातात् परिपात मद्य मे ।
इतिस्म सङ्गृह्य पिता त्वदङ्गकं मुहुर्मुहुश् श्लिष्यति जातकण्टकः॥ ॥42-9॥

अनो निलीनः किल हन्तु मागतः सुरारि रेवं भवता विहिंसितः ।
रजोऽपि नो दृष्टममुष्य तत्कथं स शुद्धसत्त्वे त्वयि लीनवान् ध्रुवम् ॥ ॥42-10॥

प्रपूजितैस् तत्र ततो द्विजातिभिः विशेषतो लम्भित मङ्ग लाशिषः ।
व्रजं निजैर् बाल्यरसैर् विमोहयन् मरुत्पुराधीश रुजां जहीहि मे ॥ ॥42-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥